[1]तृष्णावरूत्री। [2]तृष्णाशब्द आद्युदात्तः। वरूत्रीशब्दो ग्रसितादिसूत्रे निपातितोऽन्तोदात्तः। तत्र द्वन्द्वे दीर्घत्वं पूर्ववत्।

'बम्बाविश्ववयसौ' (तै. सं. ६.६.८.४)। बम्बशब्दोऽन्तोदात्तः। विश्ववयःशब्दोऽपि 'बहुव्रीहौ विश्वं सञ्ज्ञायाम्' (६.२.१०६/३८४०) इति विश्वशब्दोऽन्तोदात्तः। तयोर्द्वन्द्वे दीर्घत्वं पूर्ववत्।

मर्मृत्युः। मर् इति मृञो विच्प्रत्ययः। मृत्युशब्दोऽन्तोदात्तः।

द्वन्द्वानामदेवताद्वन्द्वार्थोऽनुदात्ताद्युत्तरपदार्थश्च वनस्पत्यादिषु पाठः[3]॥

## देवताद्वन्द्वे च। (१४१/३८७५)

देवतावाचिनां यो द्वन्द्वस्तत्र युगपदुभे [4]पूर्वोत्तरपदे प्रकृतिस्वरे भवतः। इन्द्रासोमौ। इन्द्रावरुणौ। इन्द्राबृहस्पती। ऋज्रेन्द्राग्र (उणादि. १९६) इति इन्द्रशब्दः आद्युदात्तो [5]निपातितः। सोम इति मन्प्रत्ययान्तः। [6]वरुण [7]उनन्प्रत्ययान्तः, तेन आद्युदात्तः। बृहस्पतिशब्दे [8]वनस्पत्यादित्वात् द्वावुदात्तौ, तेन इन्द्राबृहस्पती इत्यत्र त्रय उदात्ता भवन्ति। देवताग्रहणं किम्? प्लक्षन्यग्रोधौ। द्वन्द्वग्रहणं किम्? अग्निष्टोमः॥

## नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु। (१४२/३८७६)

उत्तरपदे[9]ऽनुदात्तादौ पृथिवी रुद्र पूष[10]मन्थिवर्जिते देवताद्वन्द्वे नोभे युगपत् प्रकृतिस्वरे भवतः। 'इन्द्राग्नी' (तै. सं. २.२.२.१)। 'इन्द्रवायू' (तै. सं. ६.६.८.३)। अग्निवायुशब्दौ अन्तोदात्तौ। उत्तरपदग्रहणमनुदात्तादौ इत्युत्तरपदविशेषणं यथा स्यात्, द्वन्द्वविशेषणं मा भूत् इति। अनुदात्तादौ इति विधिप्रतिषेधयोः विषयविभागार्थम्। [11]अपृथिव्यादिषु इति किम्? 'द्यावापृथिव्यौ' (तै. सं. २.६.९.५)। [12]द्यावाशब्द आद्युदात्तो निपातितः। पृथिवीशब्दो [13]ङीष्प्रत्ययान्तत्वादन्तोदात्तः।

रुद्र–'[14]सोमारुद्रौ' (तै. सं. १.८.२२.५)। 'रोदेर्णिलुक् च' (उ. १८९) इति रुद्रशब्दो [15]रक्प्रत्ययान्तोऽन्तोदात्तः। पूषन्–इन्द्रापूषणौ। स्वन्नुक्षन्पूषन् (उ. १६५) [16]इति पूषान्तोदात्तो निपात्यते। मन्थिन्[18]–'शुक्रामन्थिनौ' (तै. सं. ६.४.१०.२१) मन्थोऽस्यास्ति इति मन्थी। इन्नन्तत्वादन्तोदात्तः। पृथिव्यादिषु तु उभे युगपत् प्रकृतिस्वरे भवत एव॥

## अन्तः। (१४३/३८७७)

[19]अन्तः [20]इत्यधिकारः[21]। यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र समासस्योत्तरपदस्य अन्तः उदात्तः भवति इत्येवं तद् वेदितव्यम्। वक्ष्यति 'थाथघञ्क्ताजबित्रकाणाम्' (६.२.१४४/३८७८) इति। सुनीथः। [22]अवभृथः॥

---

1. कृष्णावरूत्री ड. 2. कृष्णाशब्दः ड. 3. वनस्पतिः बृहस्पतिः शचीपतिः, तनूनपात्, नराशंसः, शुनःशेपः, शण्डामर्कौ, बम्बाविश्ववयसौ, मर्मृत्युः इति वनस्पत्यादिः इत्यधिकम् ड. 4. पूर्वपदोत्तारपदे फ. 5. निपातितः नास्ति फ. 6. वरुणशब्दः फ. 7. उनत् ब, उनत्प्रत्ययान्तौ तौ नित्यमुदात्तौ ह. 8. वनस्पत्यादिषु पठ्यते ह. 9. उत्तरपदानुदात्तादौ क. 10. मन्थि नास्ति फ. 11. अपृथिवीरुद्रमन्थिषु इति ह. 12. दिवो द्यावेत्याद्युदात्तौ निपात्येते ह. 13. ङीषन्तोऽन्तोदात्तः ह. 14. रुद्रसोमौ ह. 15. रक्प्रत्ययान्तत्वात् फ. 16. इति नास्ति फ. 18. शुकामन्थानं क. 19. उत्तरपदग्रहणमिहानुवर्तते इत्यधिकम् ह. 20. इत्ययम् ग. फ. 21. वेदितव्यः इत्यधिकम् फ, आपादपरिसमाप्तेः इत्यधिकम् ह. 22. अवभृथः नास्ति फ.